National Journal of Hindi & Sanskrit Research

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(54): 210-213
© 2024 NJHSR
www.sanskritarticle.com

पाढी प्रभाकरः
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

Correspondence:
पाढी प्रभाकरः
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# जगद्गुरुरामभद्राचार्यविरचितभृङ्गदूतखण्डकाव्ये समाजोपयोगिसूक्तयः

**पाढी प्रभाकरः**

**उपक्रमः**

संस्कृतसाहित्ये सूक्तयः मणय इव दीप्यमानाः सन्ति। एताः लघ्व्यः अपि गाम्भीर्येण पूर्णाः वाक्यरचनाः जीवनस्य यथार्थांशं सूक्ष्मदृष्ट्या उद्घाटयन्ति। ऋषिभिः दृष्टाः एताः सूक्तयः नीति-विचाराणाम्, आध्यात्मिकानुभूतेः, लौकिक-पारलौकिकज्ञानस्य च सारभूताः सन्ति। प्रायः श्लोकरूपेण निबद्धाः एताः मधुराः वाण्यः सरलं श्रवणमात्रेण अपि हृदयं स्पृशन्ति, बुद्धिं च प्रकाशयन्ति। सूक्तिषु निहितः यः शाश्वतः सन्देशः सः एव अस्माकं प्राचीनतमः मार्गदर्शकः अस्ति।

**ग्रन्थकर्तुः परिचयः**

संस्कृतसाहित्यजगति प्रथितकीर्तयो विलक्षणप्रतिभावन्तः पदवाक्यप्रमाणपारावारीणाः ज्ञानपीठ-पद्मविभूषण-साहित्याकादमीराष्ट्रियपुरस्कारादिभिः सभाजिताः प्रस्थानत्रयीभाष्यकाराः महामहोपाध्या-याः जगद्गुरुरामभद्राचार्य-दिव्याङ्गविश्वविद्यालयस्य जीवनपर्यन्तकुलाधिपतयः श्रीचित्रकूटस्थमन्दा-किनी-विमलपुलिननिवासिनः श्रीतुलसीपीठाधीश्वराः धर्मचक्रवर्तिनश्च भवन्ति श्रीमज्जगद्गुरुरामानन्दा-चार्याः स्वामिरामभद्राचार्याः।

जगद्गुरुरामानन्दाचार्याः महाकवीन्द्राः स्वामिश्रीरामभद्राचार्याः लोकोत्तरगुणगणैः समलङ्कृतः आप्तपुरुषो वर्तन्ते। विद्वज्जगति स्वामिश्रीरामभद्राचार्याणां व्यक्तित्वं, कृतित्वञ्च विलक्षणं वर्तते ।

**ग्रन्थपरिचयः**

भारतीयसाहित्ये दूतकाव्यपरम्परा प्राचीना अस्ति। रामायण-महाभारत-भागवतादिषु अनेकानि दूतकाव्यानि सन्ति। तत्र कालिदासकृतं मेघदूतं, वेदान्तदेशिककृतं हंससंदेशः, रूपगोस्वामिकृतं हंसदूतम् इत्येतानि प्रसिद्धानि दूतकाव्यानि सन्ति। एतेषु कालिदासः मेघदूते स्वकीये काल्पनिके नायक-नायिके निर्माय नूतनं मार्गं प्रदर्शितवान्। किन्तु सः मार्गः मुमुक्षुभिः कामवर्णनप्रधानतया न स्वीकृतः इति मन्यते। तस्मात् वेदान्तदेशिकवर्येण हंससन्देशः रचितः, यत्र मन्दाक्रान्तावृत्तेन सीतारामविषयकः विप्रलम्भ-शृङ्गारः वर्णितः। रूपगोस्वामिना हंसदूते तु श्रीकृष्णं प्रति रुक्मिण्याः सन्देशः ललितशैल्या निबद्धः।

अत्र श्रीस्वामिरामभद्राचार्याः श्रीसीतारामचरणयोः भक्त्या अनुप्राणीतः सन्, मन्दाक्रान्तावृत्तेनैव "भृङ्गदूतम्" नामकं दूतकाव्यं रचितवन्तः। अत्र भगवान् रामः लीलया मनोभृङ्गं दूतं कृत्वा लङ्कां गतां सीतां प्रति प्रेषयति। पूर्वभागे भारतस्य पवित्रस्थलानि वर्णितानि, उत्तरभागे सीतायै सन्देशः तथा श्रीसीतारामयोः दिव्यप्रेम च वर्णितम् अस्ति। इदं काव्यं मन्दाक्रान्तावृत्ते रचितम् अस्ति। अत्र ५०१ श्लोकाः सन्ति। इदं काव्यं शुद्धभक्तिरसप्रधानं सत् संस्कृतिबोधकं च अस्ति। जनसामान्यस्य सुबोधार्थं कवेः अस्य व्याख्यां राष्ट्रभाषायाम् (हिन्द्यां) अपि कृतवान् अस्ति। अत्र कविः मुक्तकण्ठेन कथयति यत् सर्वे रामभक्ताः इदं काव्यं पठन्तु, गायन्तु, चिन्तयन्तु च।

**संस्कृतसाहित्ये सूक्तयः**

संस्कृतसाहित्ये सूक्तयः इति तानि धर्मबोधकानि संस्कृतवाक्यरत्नानि सन्ति येषु गम्भीरार्थाः सरल-सुन्दरशैल्या निबद्धाः सन्ति। एतासु सूक्तिषु भारतीयजीवनदर्शनस्य, नीतिशास्त्रस्य, आध्यात्मिकचिन्तन-

स्य च सारतत्त्वं सङ्गृहीतं वर्तते। सूक्तीनां शाब्दिकोऽर्थः 'सुष्टु उक्ता' इति भवति। अत्र 'सु' इत्युपसर्गेण शोभनता सूचिता भवति, 'उक्तिः' इति शब्देन वचनं बोध्यते। तथैव सूक्तयः शोभनानि उक्तानि, मधुराणि सार्थकानि च वचनानि सन्ति। संस्कृतवाङ्मये मनुस्मृतेः, महाभारतादिग्रन्थेभ्यः आरभ्य भर्तृहरेः, भासस्य, कालिदासस्य, भवभूतेः, चाणक्यस्य इत्यादिकविनाट्यकाराणां ग्रन्थेषु सूक्तयः सर्वत्र विकीर्णाः सन्ति।

सूक्तीनां प्रयोजनं केवलं काव्यसौन्दर्यप्रदर्शनं न, अपि तु जीवनस्य यथार्थमार्गदर्शनं,चारित्र्यनिर्माणं,बुद्धिविकासः,आत्मोन्नतिश्च विद्यते। सूक्तिषु नैतिकमूल्यानि, सामाजिकदायित्वं, कर्तव्यपालनं, धैर्यं, सत्यं, दया, क्षमा, विवेकः इत्यादयः गुणाः प्रतिपादिताः। यथा – 'उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः' इति सूक्तिः उद्योगस्य महत्त्वं प्रतिपादयति। 'अहिंसा परमो धर्मः' इति वचनं जीवनमूल्यं प्रस्तौति। 'विद्या ददाति विनयं' इति सूक्तिर्विद्यायाः वास्तविकं प्रयोजनं निरूपयति।

सूक्तयः केवलं शाब्दिकचमत्कारेण एव न, अपि तु तासु निहितैः जीवनोपयोगिभिः सन्देशैः जनानां हृदयस्पर्शिन्यः भवन्ति। ताः मानवजीवनस्य विविधपक्षान् स्पृशन्ति। समाजस्य उन्नतये मार्गदर्शिका इव सन्ति। ताः पठित्वा मनुष्यः जीवनस्य कठिनतमासु परिस्थितिषु अपि धैर्यं न त्यजति, सन्मार्गे एव तिष्ठति। सूक्तिषु निहिता नीतिः सार्वकालिकी, सार्वभौमिकी च अस्ति। युगान्तरेषु अपि तासां प्रासङ्गिकता यथावत् तिष्ठति।

सङ्क्षेपतः, सूक्तयः संस्कृतसाहित्यस्य मुक्तामणयः इव सन्ति। ताः भारतीयसंस्कृतेः सारस्वतसम्पत् वर्तते। तासाम् अध्ययनेन, मननेन, चिन्तनेन च मनुष्यः न केवलं भाषिककौशलं, अपि तु जीवन-कौशलमपि प्राप्नोति। सूक्तयः जीवनस्य सार्थकतां, शान्तिं, सन्तोषं च प्रापयितुं समर्थाः सन्ति। एतासां प्रचारः, प्रसारः च संस्कृतभाषायाः एव न, अपि तु समग्रस्य मानवजातेः कल्याणाय अपेक्षितः वर्तते।

**भृङ्गदूतखण्डकाव्ये समाजोपयगिन्यःसूक्तयः**

**सूक्तिः-1. पूज्यपूजा गुणाय ।**
**तस्मै कर्णे जपप्रकृतये प्रेमविद्याचणाय**
**स्निग्धं स्तम्बेरमगुणजुषे जीवितार्थी रमायाः।**
**स्रग्वी स्वस्रक्सरसिजरसं स्वर्घ्यमाविश्चकार**
**प्रीत्या काले किल बहुमता पूज्यपूजा गुणाय॥**[1]

आशयः वर्तते श्लोकस्यास्य यत् श्रीरामचन्द्रः सीतां प्रति स्वस्य सन्देशस्य प्रेषणार्थं भृङ्गं प्रति प्रीतिप्रमुखवचनैः निवेदनं करोति, एवं च नलिनीरसमर्घ्यत्वेन कल्पयित्वा ससम्मानं तं भृङ्गं रञ्जयति। किमर्थम् इति चेत् कालिदासेन उक्तम् – प्रतिबन्धाति हि श्रेयः पूज्यपूजाव्यतिक्रमः" इति।

लोकेऽपि तथैव भवति, यदा कस्यापि कार्यस्य सम्पादनार्थं वयं यस्य कस्यापि साहाय्यं प्रासुम् इच्छामः, तदा तस्य कृते सुमधुरवचनैः, विभिन्नक्रिया–कलापैः, भोजन–पानादिकैः वयं तस्य आनन्दार्थं स्वस्य यथा समयेन कार्यसम्पादनार्थं निवेदनं कुर्मः। येन अस्माकं कार्यं समयेन पूर्णं भवति। तथा अस्य श्लोकस्य व्याजेन कविः वक्तुमिच्छति यत् मानवसमाजे मधुरवचनसाहाय्येन एवं च सौहार्देनैव अस्माभिः यत्किमपि कार्यं सम्पादयितुं शक्यते। अनेन भवति यत् कार्यंसम्पादनार्थं यः नियुक्तः भवति सः प्रसन्नो भूत्वा झटिति कार्यं करोति। तेन ज्ञायते यत् विलम्बः मा करणीयः। यतो हि उक्तं च कालिदासेन –

**"मन्दायन्ते न खलु सुहृदाम् अभ्युपेतार्थकृत्याः।"**[2]

**सूक्तिः-2. प्रायः सन्तः श्रितमधुकरी वृत्तयः सत्क्रियन्ते।**
**तत्वं मत्वा मधुकरचिरं रातरामाविहारम्**
**भैङ्गं भैक्षं कुलकमलिनीर्मार्गमाणो मरन्दम्।**
**सम्पूज्येथाः श्वसुरनगरे पूपुरन्ध्रीभिरुच्चैः**
**प्रायः सन्तः श्रितमधुकरी वृत्तयः सत्क्रियन्ते॥**[3]

इत्यस्मिन् श्लोके श्रीराममुखेन कविः कथयति यत् पुनौरा धामक्षेत्रे एका पुष्करिणी अस्ति। पुराकाले सा पुष्करिणी भगवत्याः सीतायाः बाल्यक्रीडार्थं प्रयुज्यते। तस्मात् सापि पुण्यवतीति कवेः अभिप्रायः। पुष्करिणीं परितः बह्व्यः नलिन्यः लताः पुष्पाणि च सन्ति। गमनसमये तासां लतानामुपरि प्रफुल्लितपुष्पात् स्वकीयजनानां कृते मकरन्दं स्वीकृत्य त्वं गच्छ इति कविः भृङ्गं प्रति कथयति। यतो हि मधुकरस्य मधुकरवृत्तिः प्रसिद्धाएव।

लोकस्य कृतेऽपि इयमेव वार्ता सार्थकी किमर्थम् इति चेत् धनाढ्यपुरुषाणां धनम् आर्तजनानाम् उपकाराय त्राणाय वा भवति। येन ये धनाढ्यपुरुषाः भवन्ति ते सामाजिकानां मध्ये सम्माननं प्राप्नुवन्ति। तथा अनेन पारलौकिकसुखार्थं पुण्यस्यापि अर्जनं भवति। तेषां कीर्तिः स्वर्गगामी भवति। ये तथा न कुर्वन्ति ते सर्वदैव लोके निन्दायाः पात्रं भवन्ति। एवं च तेषां धनं येन केनापि प्रकारेण नष्टं तु भवत्येव। अनेन सिद्ध्यति यत् लोकेऽपि जनै मधुकरवृत्तिवत् अध्ययनदानादिकं कर्तव्यम् इति। अस्मिन्नेव सन्दर्भे कालिदासेन उक्तम् -

**"आपन्नार्तिप्रशमनफलाः सम्पदो हि उत्तमानाम्"**[4]

**सूक्तिः-3. को न नष्टः कुसङ्गात्।**
**दासी वाक्याद्विचलितमतिर्मामदोषं विवास्य**
**प्रायश्चित्त प्रबलदहनोद्दग्धनाथा विनाथा।**
**शोचत्यम्बा सुतविरहिता येव गुष्टिर्विवत्सा**
**साश्रुर्नित्यं व्यसुरिव तनु को न नष्टः कुसङ्गात्॥**[5]

श्लोकेऽस्मिन् कुसङ्गत्याः मन्थारायाः साहचर्यवशेन भाग्यवैपर्ययेन कैकेय्याः वैधव्यावस्थायाः वर्णनमुद्धृतमस्ति। एवञ्च तेनैव कारणेन श्रीरामेण सह स्वपुत्रात् भारतादपि दूरीभूता। तथा स्वयमपि अश्रुयुक्तेन नेत्रेण जीवितात्त्वेऽपि निष्प्राणा इव जीवनं यापितवती। सत्यमेव उक्तं कविना यत् **'को न नष्टः कुसङ्गात्'**।

लोकेऽपि प्रचलितः वर्तते **'संसर्गात् दोषगुणाः जायन्ते'**। उपर्युल्लिखितश्लोकेऽपि इयमेव वार्ता कविना प्रदर्शिता। अत्र तु मन्थरायाः साङ्गत्येन कैकेयी सर्वम् अनिष्टं साधितवती। यतो हि तस्याः तादृशः

स्वभावः न आसीत् किमर्थमिति चेत् सा राजकन्या। पूर्वं सा राजानुकूलं व्यवहारमाचरति स्म। किन्तु कुत्सितायाः मन्थरायाः साङ्गत्येन तस्याः बुद्धिः भ्रष्टा जाता। अनेन सिद्ध्यति यद् अस्माभिः सर्वदैव कुसङ्गत्याः त्यागः करणीयः। यतो हि नद्यां धूलिकाप्रक्षेपेन यथा स्वजलम् एव मलिनं भवति तथैव कुसङ्गात् सुचरित्रम् अपि दुश्चरित्रं भवति। तस्मात् कुसङ्गतिः सर्वदैव त्याज्या।

**सूक्तिः-4. सोढुं नैव प्रभवति पितुर्मानभङ्गं सुपुत्री।**
**सम्बन्धिन्याः पितरि पतितं सङ्कटं सञ्जिहीर्षुः**
**श्वश्रू चूडामणिशतरुचीन्कोटिकोटीन् विधित्सुः।**
**सीतान्यर्मान् मणिमयगिरिं स्वीयसत्वात् क्षणार्धात्**
**सोढुं नैव प्रभवति पितुर्मानभङ्गं सुपुत्री॥**[6]

अस्मिन् श्लोके अत्यन्तरमणीयं पारिवारिकसौहार्द्रस्य वर्णनं प्रदर्शितम् अस्ति। त्रेतायुगेऽपि स्त्रियः स्वपितृकुलस्य मानभङ्गं कदापि न सहितवत्यः इति कविः कैकेयी-सीतयोः वर्णनव्याजेन स्पष्टयति।

लोकेऽपि समाना परिस्थितिः प्रायेण भवत्येव। किमर्थम् इति चेत् स्त्री सर्वं परित्यज्य पत्युः कुलं समायाति। आगमनानन्तरं पतिरेव परमेश्वरतुल्यो भवति। पुराणेऽपि अस्माभिः द्रष्टुं शक्यते यत् देवादिदेवमहादेवोऽपि स्वस्वसुः हिमालयस्य सम्माननस्य सत्कारस्य च करणे कदापि शिथिलव्यवहारः नाभवत्। येन पार्वतीपरमेश्वरयोः दाम्पत्यजीवनं सुमधुरेण सौहार्देण प्रचलति स्म। अत्र इयमेव शिक्षाप्रदा वार्ता यत् कदापि सुखेन दाम्पत्यजीवननिर्वहणार्थं स्वस्वसृकुलस्य अवहेलना, तिरस्कारः, निन्दा च न करणीयः।

**सूक्तिः-5. दुर्लभं त्यागिनः किम्।**
**तत् त्वं गत्वा मम तत सखाध्यासितं स्थानमीड्यं**
**श्रद्धातोयं वितर मधुलिड् स्वर्गिणे मेऽथ पित्रे।**
**यो मन्नेत्राम्बुरुहविगलद्बाष्पधाराभिषिक्तो**
**यातो लोकं हरिहरनुतं दुर्लभं त्यागिनः किम्॥**[7]

अस्मिन् श्लोके श्रीरामः भ्रमरं (मधुपं) प्रति कथयति यत् सः तं पवित्रं स्थानं गच्छेत् यत्र तस्य पितुः दशरथस्य मित्रं जटायुः पूर्वं निवसति स्म। तत्र गत्वा, भ्रमरेण श्रद्धापूर्वकं तस्य स्वर्गोषितस्य पितुः कृते मधुतर्पणं करणीयम्। श्लोकस्य द्वितीयभागे पुनः श्रीरामः कथयति यत् तस्य पिता दशरथः, तस्य नेत्राभ्यां प्रवहन्तीभिः अश्रुधाराभिः स्नानम् (कृत्वा) आचर्य (अर्थात् रामस्य शोकं स्वीकृत्य) स्वर्गलोकं प्रति प्रस्थितवान्। सः त्यागी पुरुषः आसीत् तादृशं च त्यागि व्यक्तित्वं भगवान् विष्णुः शङ्करश्च नमन्ति। तादृशस्य महतः त्यागिनः कृते अस्मिन् संसारे किमपि प्राप्तुं दुर्लभं न भवति अर्थात् तस्मै सर्वं प्राप्तम् इति।

अस्य श्लोकस्य सामाजिकमहत्त्वम् एवं भवति यथा - श्रीरामः स्वपितुः दशरथस्य स्मरणं कुर्वन् श्रद्धाञ्जलिं दातुं भ्रमरं प्रेषयति। एतत् समाजे पितृऋणस्य, पितृभक्तेश्च महत्त्वं द्योतयति। जटायुः श्रीरामस्य पितुः मित्रम् आसीत्, तस्य स्थानं च श्रद्धया स्मर्यते। एतत् मैत्र्याः, स्नेहस्य च शाश्वततां प्रतिपादयति यत् मित्रता मरणोत्तरम् (मरणानन्तरम्) अपि तिष्ठति। रामस्य अश्रूणि तस्य शोकस्य स्वाभाविकी मानवीयाम् अभिव्यक्तिं दर्शयन्ति। एतत् सूचयति यत् शोकः स्वाभाविकः एव, तं प्रकटीकर्तुं न लज्जितव्यम्। अन्तिमा पङ्क्तिः "त्यागिनः किं दुर्लभम्" इति प्रश्नं कुर्वती त्यागिनः उच्चस्थानं प्रतिपादयति। समाजे परोपकारिणां त्यागिनां च सदैव महत्त्वं भवति। पूर्वजानां स्मरणं, तेभ्यः श्रद्धाञ्जलिदानं च सांस्कृतिकपरम्परायाः अङ्गम् अस्ति। एतत् सामाजिकसांस्कृतिकधारणायाः संरक्षणं करोति। अस्य श्लोकस्य निष्कर्षः- अत्र पारिवारिकबन्धनानां, मैत्र्याः, श्रद्धायाः, सांस्कृतिकमूल्यानाञ्च महत्त्वं प्रस्तुतम्। एते गुणाः यदि कुटुम्बेषु समाजेषु च पाल्यन्ते, तर्हि ते दृढाः मानवीयाश्च भवन्ति।

**सूक्तिः-6. नूनं नारीं नयति निरयं नैरृतिं भूरि लोभः।**
**पश्येः स्वर्द्रूद्रुव सुमनसां वाटिकां वाटिकाप्ता**
**सीता यत्र प्रशमित रुजा पुष्प चायं चरन्ती।**
**लुब्धा माया कनकहरिणे प्राहिणोन्मां तमाप्तुम्**
**नूनं नारीं नयति निरयं नैरृतिं भूरि लोभः॥**[8]

अस्मिन् श्लोके श्रीरामः स्वमित्रं भ्रमरं सम्बोधयति। सः कथयति - हे भ्रमर त्वं मम आश्रमस्य सुन्दरीं पुष्पवाटिकाम् एकवारं पश्य। अत्र सीतामाता पुष्पाणि सञ्चिन्त्वती आसीत्। एकदा सा तु कपटेन निर्मितं सुवर्णमृगं दृष्ट्वा मोहिता अभवत्। सुवर्णमृगरूपेण स्थितं मारीचराक्षसं दृष्ट्वा, सा मां तं मृगं प्राप्तुं प्रेषितवती। परन्तु तत् तस्याः माया आसीत्। अतः एतत् ज्ञायते यत् 'अत्यधिकः लोभः नारीं नरकं प्रति नयति' इति।

अयं श्लोकः अस्मान् शिक्षयति यत् अतिलोभः महान् अपायः अस्ति इति। श्लोकेऽस्मिन् कथ्यते यत् सीतादेवी स्वर्णमृगे लुब्धा अभवत्। तस्यैव अतिलोभस्य कारणेन तस्याः पतिः श्रीरामः वनं प्रति प्रेषितः। फलतः तयोः विरहः अभवत्, दुःखं च प्राप्तम्। एषः घटनाक्रमः अस्मभ्यं दर्शयति यत् अत्यधिकं लोभं कुर्वन्तः जनाः स्वस्य एव दुःखाय मार्गं प्रशस्तयन्ति। लोभः मानवान् विवेकहीनं करोति, येन सः अनिष्टं फलं प्राप्नोति। अतः अस्माभिः सदैव सन्तुष्टं चित्तं धारयितव्यम्। यत् प्राप्तं तेन एव सन्तोषः करणीयः, नास्माभिः असम्भवानां वस्तूनां निमित्तं धावितव्यम्। अयमेव सुखजीवनस्य मूलमन्त्रः अस्ति। अयं श्लोकः लोभात् दूरं रक्षितुं, सन्तोषं च अङ्गीकर्तुं प्रबोधयति। एषा शिक्षा सर्वेभ्यः जनेभ्यः अतीव उपयोगीनी भवति।

**सूक्तिः-7. मर्यादां हा किमिह सुखिनी स्याद् व्यतिक्रम्य नारी।**
**रेखां पश्येस्तदनुधनुषा निर्मितां लक्ष्मणेन**
**त्रातुं कृच्छ्राद् धरणिजनुषं शास्त्रवाद् गामिवार्षीम्।**
**यां लङ्घित्वा कपटयतिना सङ्कटं प्राप सीता**
**मर्यादां हा किमिह सुखिनी स्याद् व्यतिक्रम्य नारी।।**[9]

अत्र श्लोके सीताहरणस्य घटनायाः उल्लेखः अस्ति। पूर्वं लक्ष्मणेन स्वभ्रातृभक्त्या सीतारक्षार्थं धनुषा एका रेखा आकृष्टा। सा रेखा वेदादेशस्य इव पवित्रा अचला च आसीत्। किन्तु कपटी रावणः संन्यासिनो वेषं धृत्वा सीतां तां रेखां लङ्घयितुं बबाधे, यस्य

परिणामतः सीतायाः हरणम् अभवत् तथा सा गहने सङ्कटे पपात। अस्याः घटनायाः माध्यमेन कविः एकं गहनं सामाजिकं नैतिकं च प्रश्नम् उत्थापयति - किं कोऽपि नारी शास्त्राणां विधत्ताः मर्यादाः (नियमाः/सीमाः) अतिक्रम्य कदापि सुखिनी भवितुं शक्नोति वा? इति अत्र अस्य युगस्य मान्यता परिलक्ष्यते यत् नार्याः सुरक्षा सुखं च निर्धारितासु मर्यादासु एव निहितम् अस्ति।

अस्य श्लोकस्य प्रमुखा सामाजिकी उपादेयता अस्ति यत् एषः श्लोकः स्त्रीणां रक्षणार्थं निर्धारितां सामाजिकीं मर्यादां दृढतया प्रतिपादयति। श्लोके 'लक्ष्मणरेखा' सनातनधर्मशास्त्रानुसारेण नारीर-क्षार्थं विहितानां नैतिकसामाजिकानां सीमानां प्रतीकम् अस्ति। 'मर्यादा-'शब्देन अत्र केवलं भौतिकी सीमा एव न, अपि तु आचारसंहिता, पतिव्रतधर्मः, सतीत्वं च सूच्यते। एषः श्लोकः सामाजिकं सन्देशं ददाति यत् शास्त्रोक्तमार्गस्य अतिक्रमणं दुःखस्य एव कारणं भवति। सीतायाः दुःखं केवलं व्यक्तिगतं नासीत्, अपि तु तत् समग्रस्य अयोध्याराज्यस्य, रामपरिवारस्य च दुःखस्य कारणम् अभवत्। अतः प्रत्येकं व्यक्तिः, विशेषतः नारी, शास्त्रविहितां मर्यादां पालयित्वा एव सुखं च शान्तिं प्राप्तुं शक्नोति इति शिक्षां प्रयच्छति। पारिवारिक-सामाजिक-नैतिकबन्धनानांमहत्त्वं स्पष्टीकरोति। अन्ततः, एतत् व्यक्तेः स्वार्थं परित्यज्य समष्टेः कल्याणार्थं विहितानां नियमानां पालनस्य आवश्यकतां बोधयति, यत् भारतीयसंस्कृतेः मूलाधारः अस्ति।

**उपसंहारः -**

एवं स्पष्टं भवति यत् भृङ्गदूतखण्डकाव्ये विद्यमानसूक्तयः केवलं शब्दसमूहा एव न, अपितु ताः मानवीयानुभवस्य सारसङ्ग्रहाः सन्ति। ता : जीवनस्य गहनतमसत्यानि सरलसुबोधशैल्या प्रकाशयन्ति, मार्गदर्शनं कुर्वन्ति च। स्मृतौ स्थिरां सूक्तिं धारयन् मानवः विपदि धैर्यं, समृद्धौ विनम्रतां, तथा सर्वत्र धर्माचरणं शिक्षते। सूक्तीनां शक्तिः अविश्रान्तप्रासंगिकतायाम् अस्ति – युगान्तरेषु अपि ता : नूतनार्थं प्रस्फुरयन्ति, पथिकस्य दीपस्तम्भवत् मार्गं प्रकाशयन्ति च। अतः, एताः शाश्वतमूल्याः सूक्तयः न केवलं वैयक्तिकजीवनस्य, अपि तु सामाजिकसांस्कृतिकजीवनस्य अपि मूलाधाराः सन्ति।

**पादटीकाः**

1) पू.भृङ्ग.- पूर्वभृङ्गः (भृङ्गदूतम्)
2) उ.भृङ्ग.- उत्तरभृङ्गः (भृङ्गदूतम्)
3) पू.मेघ.- पूर्वमेघः (मेघदूतम्)

**सन्दर्भग्रन्थसूची-**

1.संस्कृतसाहित्येतिहासः - आचार्यः श्रीरामचन्द्रमिश्रः, चौखम्बा विद्याभवनम्, वाराणसी, 2007
2.संस्कृत वाङ्मय का बृहद् इतिहास- जगन्नाथ पाठक, उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनौ, 2000
3.भृङ्गदूतम् (संस्कृतखण्डकाव्यम्)- स्वामी रामभद्राचार्यः, जगद्गुरुरामभद्राचार्यविकलाङ्ग विश्वविद्यालयः, चित्रकूटः, 2005
4. मेघदूतम् - आचार्यः दयाशङ्कर शास्त्री, चौखम्बा विद्याभवनम्, वाराणसी, 2009
5. www.jagadgururambhadracharya.org

**संदर्भः**

[1] भृङ्ग.पूर्व-8
[2] पू.मेघ.-38
[3] पू.भृङ्ग.-46
[4] पू.मेघ.-53
[5] पू.भृङ्ग.-106
[6] पू.भृङ्ग.-142
[7] उ.भृङ्ग.-17
[8] उ.भृङ्ग.-27
[9] उ.भृङ्ग.-29